# WEST BENGAL STATE UNIVERSITY

B.A./B.Com. Programme 3rd Semester Examination, 2022-23

## SANLCOR01T-SANSKRIT (MIL)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क—विभागः

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) हितोपदेशे कति विभागाः सन्ति ? के च ते ?

(ख) मित्रलाभग्रन्थस्य मङ्गलाचरणे कस्य स्तुतिः विहिता ? स च कीदृशः ?

(ग) मित्रलाभग्रन्थानुसारं विद्याप्रशंसासूचकं यथेच्छमेकं श्लोकं लिखत।

(घ) सुदर्शनो नाम नरपतिः कुत्र आसीत् ? सः पुत्राणां नीतिशिक्षार्थं कं नियुक्तवान् ?

(ङ) कः आसीत् चित्रग्रीवः ? तस्य मित्रस्य नाम किमासीत् ?

(च) के दोषाः भूतिमिच्छता पुरुषेण हातव्याः ?

(छ) कङ्कणस्य लोभेन पथिकस्य का दशा अभवत् ?

2. अधोलिखितेषु यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) मित्रलाभग्रन्थानुसारं शैशवे नीतिशिक्षायाः उपयोगितां प्रतिपादयत।

(ख) विष्णुशर्मप्रोक्तं कपोतवृत्तान्तं समासेन वर्णयत।

### ख—विभागः

3. अधोलिखितेषु यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) नीतिशतकमवलम्ब्य विद्यायाः प्रयोजनमालोचयत।

(ख) नीतिशतके मूर्खाणां चारित्रिकवैशिष्ट्यं केन रूपेण उपस्थापितं तद्विषये स्वभाषया आलोचयत।

4. अधोलिखितेषु <u>चतुर्णां</u> श्लोकानां व्याख्या कार्या। तासु <u>यथेच्छमेका</u> संस्कृतेन देवनागरलिप्या च कार्या। 5×4 = 20

(क) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति॥

(ख) येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥

(ग) हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति बृद्धिं पराम्।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते॥

(घ) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि॥

(ङ) स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥

——×——